# ॥ શ્રીધૂમાવત્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

.. shrIdhUmAvatyaShTottarashatanAmastotram ..

sanskritdocuments.org

August 20, 2017

.. shrIdhUmAvatyaShTottarashatanAmastotram ..

॥ શ્રીધૂમાવત્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

# Sanskrit Document Information

Text title : dhUmAvatyaShTottarashatanAmastotram

File name : dhUmAvatyaShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીધૂમાવત્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

ઈશ્વર ઉવાચ
ધૂમાવતી ધૂમ્રવર્ણા ધૂમ્રપાનપરાયણા ।
ધૂમ્રાક્ષમથિની ધન્યા ધન્યસ્થાનનિવાસિની ॥ ૧॥

અઘોરાચારસન્તુષ્ટા અઘોરાચારમણ્ડિતા ।
અઘોરમન્ત્રસમ્પ્રીતા અઘોરમન્ત્રપૂજિતા ॥ ૨॥

અટ્ટાટ્ટહાસનિરતા મલિનામ્બરધારિણી ।
વૃદ્ધા વિરૂપા વિધવા વિદ્યા ચ વિરલદ્વિજા ॥ ૩॥

પ્રવૃદ્ધઘોણા કુમુખી કુટિલા કુટિલેક્ષણા ।
કરાલી ચ કરાલાસ્યા કઙ્કાલી શૂર્પધારિણી ॥ ૪॥

કાકધ્વજરથારૂઢા કેવલા કઠિના કુહૂઃ ।
ક્ષુત્પિપાસાર્દિતા નિત્યા લલજ્જિહ્વા દિગમ્બરી ॥ ૫॥

દીર્ઘોદરી દીર્ઘરવા દીર્ઘાઙ્ગી દીર્ઘમસ્તકા ।
વિમુક્તકુન્તલા કીર્ત્યા કૈલાસસ્થાનવાસિની ॥ ૬॥

ક્રૂરા કાલસ્વરૂપા ચ કાલચક્રપ્રવર્તિની ।
વિવર્ણા ચઞ્ચલા દુષ્ટા દુષ્ટવિધ્વંસકારિણી ॥ ૭॥

ચણ્ડી ચણ્ડસ્વરૂપા ચ ચામુણ્ડા ચણ્ડનિસ્વના ।
ચણ્ડવેગા ચણ્ડગતિશ્ચણ્ડમુણ્ડવિનાશિની ॥ ૮॥

ચાણ્ડાલિની ચિત્રરેખા ચિત્રાઙ્ગી ચિત્રરૂપિણી ।
કૃષ્ણા કપર્દિની કુલ્લા કૃષ્ણારૂપા ક્રિયાવતી ॥ ૯॥

કુમ્ભસ્તની મહોન્મત્તા મદિરાપાનવિહ્વલા ।
ચતુર્ભુજા લલજ્જિહ્વા શત્રુસંહારકારિણી ॥ ૧૦॥

શવારૂઢા શવગતા શ્મશાનસ્થાનવાસિની ।
દુરારાધ્યા દુરાચારા દુર્જનપ્રીતિદાયિની ॥ ૧૧॥

નિર્માંસા ચ નિરાકારા ધૂતહસ્તા વરાન્વિતા ।
કલહા ચ કલિપ્રીતા કલિકલ્મષનાશિની ॥ ૧૨॥

મહાકાલસ્વરૂપા ચ મહાકાલપ્રપૂજિતા ।
મહાદેવપ્રિયા મેધા મહાસઙ્કટનાશિની ॥ ૧૩॥

ભક્તપ્રિયા ભક્તગતિર્ભક્તશત્રુવિનાશિની ।
ભૈરવી ભુવના ભીમા ભારતી ભુવનાત્મિકા ॥ ૧૪॥

ભેરુણ્ડા ભીમનયના ત્રિનેત્રા બહુરૂપિણી ।
ત્રિલોકેશી ત્રિકાલજ્ઞા ત્રિસ્વરૂપા ત્રયીતનુઃ ॥ ૧૫॥

ત્રિમૂર્તિશ્ચ તથા તન્વી ત્રિશક્તિશ્ચ ત્રિશૂલિની ।
ઇતિ ધૂમામહત્સ્તોત્રં નામ્નામષ્ટોત્તરાત્મકમ્ ॥ ૧૬॥

મયા તે કથિતં દેવિ શત્રુસઙ્ઘવિનાશનમ્ ।
કારાગારે રિપુગ્રસ્તે મહોત્પાતે મહાભયે ॥ ૧૭॥

ઇદં સ્તોત્રં પઠેન્મર્ત્યો મુચ્યતે સર્વસઙ્કટૈઃ ।
ગુહ્યાદ્ગુહ્યતરં ગુહ્યં ગોપનીયં પ્રયત્નતઃ ॥ ૧૮॥

ચતુષ્પદાર્થદં નૃણાં સર્વસમ્પત્પ્રદાયકમ્ ॥ ૧૯॥

ઇતિ શ્રીધૂમાવત્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIdhUmAvatyaShTottarashatanAmastotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*